ल्लीवतो जाह्नवीतीरे कूपं खनति दुर्म्मतिः।
खनते। इति दुर्गादासः॥

खनकः, पुं, (खन्+"शिल्पिनि ष्वुन्।" ३।१।१४५। इति वुन् स च षित्।) उन्दुरुः। सन्धितस्करः। सिंदेल चोर इति भाषा। भूमिवित्तज्ञः। स्वर्णाद्युत्पत्तिस्थानज्ञः। इति हेमचन्द्रः॥ (स्वनामप्रसिद्धो विदुरस्य बन्धुविशेषः। यथा, महाभारते जतुगृहे।१।१४८।१।

"विदुरस्य सुहृत् कश्चित् खनकः कुशली नरः॥")

खनकः, त्रि, (खन्+वुन्।) अवदारकः। खननकर्त्ता। इति मेदिनी॥ (यथा, गोः रामायणे।१।१२।६।

"स्थापत्ये चेह स्थाप्यन्तां दृढाः परमधार्म्मिकाः।
कर्म्मान्तिका लिपिकरा वर्धकाः खनका अपि॥")

खननं, क्ली, (खन्+भावे ल्युट्।) विदारणम्। खोँड़न खोदन इति च भाषा। यथाह कश्चित्।
"पश्य त्वं खननं नखेन तदभूदालोक्य भेकः शठः॥"

खनयित्री, स्त्री, (खन्+णिच् न वृद्धिर्निपातनात्। ततस्तृच् ङीप् च।) अस्त्रभेदः। खन्तीति भाषा। यथा, नारदपञ्चरात्रे पाद्मसंहिता।

"खनयित्री शुभा यात्रा जयार्थं जयकाङ्क्षिणाम्।
पञ्चवर्णांशुकयुता पालनीया पुरः सताम्॥"

खनिः स्त्री, (खन विदारे+"खनिकष्यज्यसीति।" उणां।४।१३९। इति इन्।) रत्नाद्युत्पत्तिस्थानम्। खानि इति भाषा॥ (यथा, रघुः।१८।२२।

"उत्खातशत्रुं वसुधोपतस्थे
रत्नोपहारैरुदितैः खनिभ्यः॥")

तत्पर्य्यायः। आकरः २। इत्यमरः।२।३।७॥ खानी ३ खनी ४ खानिः ५। इति शब्दरत्नावली॥ गञ्जा ६। इति हेमचन्द्रः॥

खनित्रं, क्ली, (खन्+"अर्त्तिलूधूसूखनेति।" ।३।२।१८४। इत्र।) अस्त्रविशेषः। खन्ता इति भाषा। तत्पर्य्यायः। अवदारणम्। इत्यमरः। २।९।१२॥ ("तथाहि भागवते।७।२।१५।
"केचित् खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान्॥")

खनी, स्त्री, (खनि+वा ङीष्।) रत्नाद्युत्पत्तिस्थानम्। इति शब्दरत्नावली॥

खपुरं, क्ली, (खं आकाशं पिपर्त्ति। पॄ+कः।) घटः। इति हेमचन्द्रः॥ (खे आकाशे चरं पुरम्।) जङ्गमं पुरम्। (स तु दैत्यपुरविशेषः। तदुत्पत्तिकथा यथा, महाभारते।३।१७३। निवातकवचवधे।७-११।

"पुलोमा नाम दैतेयी कालका च महासुरी।
दिव्यवर्षसहस्रं ते चेरतुः परमं तपः॥
तपसोऽन्ते ततस्ताभ्यां स्वयम्भूरददद्वरम्॥
अगृह्णीतां वरं ते तु सुतानामल्पदुःखिताम्।
अवध्यताञ्च राजेन्द्र! सुरराक्षसपन्नगैः॥
पुरं सुरमणीयञ्च खेचरञ्च महाप्रभम्।
सर्व्वरत्नैः समुदितं दुर्द्धर्षममरैरपि॥
महर्षियक्षगन्धर्व्वपन्नगासुरराक्षसैः।
सर्व्वकामगुणोपेतं वीतशोकमनामयम्॥
ब्रह्मणा भरतश्रेष्ठ! कालकेयकृते कृतम्।
तदेतत् खपुरं दिव्यं चरत्यमरवर्ज्जितम्॥"

खे आकाशे उत्थितं पुरम्। शुभाशुभादिसूचनार्थं प्रकाशितं गन्धर्व्वनगरम्। अस्योत्तरादिदिग्भेदेनोदये फलभेदो यथा, वृहत्संहितायाम् ३६ अध्याये।

"उदगादिपुरोहितनृपबलपतियुवराजदोषदं खपुरम्।
सितरक्तपीतकृष्णं विप्रादीनामभावाय॥
नागरनृपतिजयावहमुदग्विदिक्स्थं विवर्णनाशाय।
शान्तायां दृष्टं सतोरणं विजयाय॥
सर्व्वदिगुत्थं सततोत्थितञ्च भयदं नरेन्द्रराष्ट्राणाम्।
चौराटविकान् हन्याद्धूमानलशक्रचापाभम्॥
गन्धर्व्वनगरमुत्थितमापाण्डुरमशनिनिपातवातकरम्।
दीप्ते नरेन्द्रमृत्युर्वामेऽरिभयं जयः सव्ये॥
अनेकवर्णाकृति खे प्रकाशते
पुरं पताकाध्वजतोरणान्वितम्।
यदा तदा नागमनुष्यवाजिनां
पिबत्यसृग्भूरि रणे वसुन्धरा॥")

हरिश्चन्द्रपुरम्। इति त्रिकाण्डशेषः॥

खपुरः, पुं, (खं पिपर्त्ति उच्चत्वेन। पॄ+कः।) गुवाकः। (अस्य पर्य्याया यथा।
"खपुरो हस्तकः पूगः।" इति वैद्यकरत्नमालायाम्॥ खेन आकाशगतेन हिमकरादिना पूर्य्यते इति। पॄ+कर्म्मणि घञर्थे कः।) भद्रमुस्तकम्। (खमिन्द्रियं पिपर्त्ति। पॄ+कः।) अलसके त्रि। इति मेदिनी॥ बालनखः। इति राजनिर्घण्टः॥

खभ्रान्तिः, पुं, (खे आकाशे अन्तरिक्षे भ्रान्तिर्भ्रमणं भ्रामिवार्थं यस्य।) चिलः। इति शब्दरत्नावली॥ चिल इति भाषा॥

खमणिः, पुं, (खे आकाशे मणिरिव ज्योतिर्मयत्वात् प्रकाशकत्वाद्वा।) सूर्य्यः। इति त्रिकाण्डशेषः॥

खमीलनं, क्ली, (खानां इन्द्रियाणां मीलनम्।) तन्द्रा। इति शब्दरत्नावली॥

खम्लिः, स्त्री, (खं शून्यभूतं म्लनमस्याः पृषोदरात् साधुः। म्लराहित्यादस्यास्तथात्वम्।) कुम्भिका। इति शब्दरत्नावली॥ पाना इति भाषा॥

खम्लिका, स्त्री, (खम्लि+स्वार्थे कन् ततष्टाप्।) खम्ली। कुम्भिका। इति शब्दरत्नावली॥

खम्ब, गतौ, इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ओष्ठवर्गशेषोपधः। खम्बति। इति दुर्गादासः॥

खरं, क्ली, (खाय अन्तरिन्द्रियाय खस्य वा तीव्रतारूपगुणं रातीति। ख+रा+कः।) तीव्रम्। तत्पर्य्यायः। तिग्मम् २ तीक्ष्णम् ३॥ इत्यमरः।१।३।३५॥ (यथा, भागवते।७।८।२८।

"कृत्वाट्टहासं खरमुत्कटोत्कटं
निमीलिताक्षं जगृहे महाजवः॥"

तद्वति त्रि। यथा, रघुवंशे।८।९।

"न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव॥")

खरः, पुं, (खं सुखकृद्धरं छिद्रमतिशयेनास्यास्तीति। रः।) गर्द्दभः। इत्यमरः।२।९।७७ (यथा, मनुः।२।२०१।

"परीवादात् खरो भवति श्वा वै भवति
निन्दकः॥"

अश्वतरः। यथा, तत्रैव।११।२०।

"उष्ट्रयानं समारुह्य खरयानन्तु कामतः॥")

घर्म्मः। इति मेदिनी॥ निष्ठुरः। राक्षसविशेषः। स तु रावणभ्राता। इति हेमचन्द्रः॥ (यथा, रामायणे।१।३।२०।

"वधं खरत्रिशिरसोरुत्थानं रावणस्य च॥")

दैत्यः। इति त्रिकाण्डशेषः॥ (यथा, भागवते।२।७।३४।

"ये च प्रलम्बखरदर्दुरकेश्यरिष्ट-
मल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः॥")

कण्टकिवृक्षविशेषः। इत्यजयः॥ कङ्कः। काकः। कुररपक्षी। इति राजनिर्घण्टः॥ (वत्सरविशेषः। यथा, ज्योतिषतत्त्वे।

"उपद्रुतं जगत् सर्व्वं तस्करैर्म्मूषिकैः खगैः।
पीडिताश्च प्रजाः सर्व्वाः देशभङ्गः खरे प्रिये॥"

कठिनम्। रविपार्श्वगः। पश्चिमद्वारगृहम्। इति शब्दार्थचिन्तामणिः॥)

खरकाष्ठिका, स्त्री, (खरं उग्रं काष्ठं यस्याः। ततः कप् टाप् च। कापि अत इत्वम्।) बला। इति राजनिर्घण्टः॥

खरकुटी, स्त्री, (खरा क्षुरवत्तया तीव्रा कुटी।) नापितशालिका। नापितस्य गृहम्। इति त्रिकाण्डशेषः॥

खरकोणः, पुं, (खरवत् कोणयति शब्दायते। अत्र सङ्कोचार्थकुणधातोः शब्दार्थे इति बोध्यं धातूनामनेकार्थत्वात्। यद्वा कोणयति आत्मानं सङ्कोचयति वा। कुण+अच्। "कर्म्मण्यण्।" ३।२।१। इति अण् वा।) तित्तिरिपक्षी। इति हेमचन्द्रः॥

खरगन्धनिभा, स्त्री, (खरगन्धेन तीव्रगन्धेन नितरां अतिशयेन भातीति। नि+भा+कः।) नागबला। इति जटाधरः॥

खरगन्धा, स्त्री, (खरो गन्धो यस्याः।) नागबला। इति राजनिर्घण्टः॥

खरगृहं, क्ली, (खरस्य गर्द्दभस्य गृहम्।) गर्द्दभशाला। गादार घर इति भाषा। तत्पर्य्यायः। खरगृहः २। इति त्रिकाण्डशेषः॥

खरगेहं, क्ली, (खरस्य गेहम्।) खरगृहम्। इति शब्दरत्नावली॥

खरगृहः, पुं, (खरस्य गृहः गृहम्।) खरगृहम्। इति त्रिकाण्डशेषः। (खरो गृह्यते नियोज्यते यस्मात्। गृह+अप्। गर्द्दभगृहभेदः॥)